
# विंशः पाठः

## 'स्म - प्रयोग'

(ବର୍ତ୍ତମାନକାଳ କ୍ରିୟାରେ 'ସ୍ମ' ଯୋଗ କଲେ ଅତୀତକାଳକୁ ବୁଝାଏ ।)

## सम्भाषणम्



शिक्षकः - भो छात्राः ! अद्य किम् इच्छन्ति ?

छात्राः - श्रीमन् ! अद्य वयं विवेकानन्दविषये ज्ञातुम् इच्छामः ।

शिक्षकः - उत्तमम् । विवेकानन्दस्य बाल्यकालविषये जानन्ति वा ?

मानसः - विवेकानन्दः बाल्ये कीदृशः आसीत् ? सः किं किं करोति स्म ?

शिक्षकः - विवेकानन्दः बाल्ये साहसी आसीत् । सः बहु क्रीड़ति स्म । प्रतिदिनं देवालयं गच्छति स्म । धर्मविषये गुरुजनान् पृच्छति स्म ।

लता: - सः अन्यत् किं करोति स्म ?

शिक्षक: - विवेकानन्दः जनसेवां करोति स्म। सः प्रतिदिनं निरामिषं खादति स्म।

उमेशः - श्रीमन्! मम माता वदति स्म - यत् विवेकान्दः दक्षिणेश्वरमन्दिरं गच्छति स्म।

शिक्षक: - आम्। स प्रतिदिनं दक्षिणेश्वरं गच्छति स्म। रामकृष्णदेवं गुरुरूपेण स्वीकरोति स्म।

गीता: - तस्य विषये अन्यः कोऽपि विशेषः ?

शिक्षक: - सः सर्वदा संहतिम् इच्छति स्म। तस्य प्रभावेण युवकाः संघटिताः भवन्ति स्म। तस्य बाल्यनाम नरेन्द्रः भवति स्म। कालान्तरे सः विश्वविख्यातः भवति स्म। सः देशे विदेशे भ्रमति स्म। भारतीयसंस्कृतिम् उपदिशति स्म।

अस्तु, अद्य पर्याप्तम्। श्वः पुनः नूतनं विषयं ज्ञास्यामः।

## अभ्यासः (ଅଭ୍ୟାସ)



१. उत्तरं लिखतु - (ଉତ୍ତର ଲେଖ)

क) विवेकानन्दः बाल्ये कीदृशः आसीत् ?
ख) प्रतिदिनं विवेकानन्दः किं खादति स्म ?
ग) विवेकानन्दः कं गुरुरूपेण स्वीकरोति स्म ?
घ) विवेकानन्दस्य बाल्यनाम किं भवति स्म ?
ङ) कः भारतीयसंस्कृतिम् उपदिशति स्म ?

२. उचितपदेन शून्यस्थानं पूरयतु - (ଶୁଦ୍ଧପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) ________ विषये अन्यः कोऽपि विशेषः।
ख) विवेकानन्दः ________ करोति स्म।
ग) धर्मविषये ________ पृच्छति स्म ?
घ) नूतनं विषयं ________।
ङ) वयं विवेकानन्दविषये ________ इच्छामः।

(जनसेवां, तस्य, ज्ञास्यामः, ज्ञातुम्, गुरुजनान्)

३. स्तम्भं मेलयतु - (ସ୍ତମ୍ଭମିଳନ କର)

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| माता | गच्छति स्म |
| दक्षिणेश्वरं | खादति स्म |
| निरामिषं | वदति स्म |
| विश्वविख्यातः | इच्छति स्म |
| संहतिम् | भवति स्म |

४. मातृभाषया अनुवादं करोतु । (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

क) विवेकानन्दः बाल्ये साहसी आसीत् ।

ख) प्रतिदिनं देवालयं गच्छति स्म ।

ग) विवेकानन्दः जनसेवां करोति स्म ।

घ) मम माता वदति स्म ।

ङ) कालान्तरे सः विश्वविख्यातः भवति स्म।

५. वाक्यानि रचयतु । (ବାକ୍ୟରଚନା କର)

मम, प्रतिदिनम्, स्म, नूतनम्, करोति, खादति ।

## शब्दार्थाः

**अद्य - ଆଜି, किम् - କ'ଣ, श्रीमन् - ମହାଶୟ, ज्ञातुम् - ଜାଣିବାକୁ, उत्तमम् - ଭଲ, करोति स्म - କରୁଥିଲେ, आसीत् - ଥିଲେ, क्रीड़ति स्म - ଖେଳୁଥିଲେ, स्वीकरोति स्म - ଗ୍ରହଣ କରିଥିଲେ, कोऽपि - କିଛି କେହିହେଲେ ମଧ୍ୟ, तस्य - ତାଙ୍କର, पर्याप्तम् - ଯଥେଷ୍ଟ, पुनः - ପୁଣି, संहतिम् - ଏକତା, ज्ञास्यामः - ଜାଣିବା**